श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## रास पंचाध्याय (10.29)



भक्तों मे ज्यों गोपी श्रेष्ठ, मुनियों में ज्यों व्यास।
पुराणों में ज्यों भागवतम्, लीला में महारास।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्

नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्

श्रीमद्भागवतमहापुराणम्

दशमः स्कंधः

अथैकोनत्रिंशोऽध्यायः

श्रीशुक उवाच

भगवानपि ता रात्रीः(श्), शरदोत्फुल्लमल्लिकाः ।
वीक्ष्य रन्तुं(म्) मनश्चक्रे, योगमायामुपाश्रितः ॥ 1॥

शरदोत् + फुल्ल+ मल्लिकाः, योगमाया+ मुपाश्रितः

तदोडुराजः(ख्) ककुभः(ख्) करैर्मुखं(म्),
प्राच्या विलिम्पन्नरुणेन शन्तमैः ।
स चर्षणीनामुदगाच्छुचो मृजन्,
प्रियः(फ्) प्रियाया इव दीर्घदर्शनः ॥ 2॥

विलिम्+ पन् + नरुणेन, चर्षणीना+ मुदगाच् +छुचो

दृष्ट्वा कुमुद्वन्तमखण्डमण्डलं(म्),

रमाननाभं(न्) नवकुं(ङ्)कुमारुणम्।

वनं(ञ्) च तत्कोमलगोभिरं(ञ्)जितं(ञ्),

जगौ कलं(वँ) वामदृशां(म्) मनोहरम् ॥ 3॥

कुमुद्+ वन्त+ मखण्ड+ मण्डलं(म्),

नव+ कुं(ङ्)कुमा+ रुणम्, तत्को+ मलगो+ भिरं(ञ्)जितं(ञ्)

निशम्य गीतं(न्) तदनङ्गवर्धनं(वँ),

व्रजस्त्रियः(ख्) कृष्णगृहीतमानसाः ।

आजग्मुरन्योन्यमलक्षितोद्यमाः(स्),

स यत्र कान्तो जवलोलकुण्डलाः ॥ 4॥

तदनङ्ग+वर्धनं(वँ), कृष्ण+ गृही+ तमानसाः, आजग्मुरन्+ योन्य+ मलक्षितो+ द्यमाः(स्)

दुहन्त्योऽभिययुः(ख्) काश्चिद्, दोहं(म्) हित्वा समुत्सुकाः ।

पयोऽधिश्रित्य सं(यँ)याव- मनुद्वास्यापरा ययुः ॥ 5॥

दुहन्त्योऽ+भिययुः(ख्), पयोऽ+ धिश्रित्य, मनुद् + वास् + यापरा

परिवेषयन्त्यस्तद्धित्वा, पाययन्त्यः(श्) शिशून् पयः ।

शुश्रूषन्त्यः(फ्) पतीन् काश्चि- दश्नन्त्योऽपास्य भोजनम् ॥ 6॥

परिवे+ षयन्त्यस्+ तद्+ धित्वा, शुश्रू+षन्त्यः(फ्), दश् + नन्त्योऽ+ पास्य

लिम्पन्त्यः(फ्) प्रमृजन्त्योऽन्या, अं(ञ्)जन्त्यः(ख्) काश्च लोचने ।

व्यत्यस्तवस्त्राभरणाः(ख्), काश्चित् कृष्णान्तिकं(यँ) ययुः ॥ 7॥

प्रमृजन्+ त्योऽन्या, व्यत्यस्+ तवस्त्रा+भरणाः(ख्)

ता वार्यमाणाः(फ्) पतिभिः(फ्), पितृभिर्भ्रातृबन्धुभिः ।

गोविन्दापहृतात्मानो, न न्यवर्तन्त मोहिताः ॥ 8॥

पितृभिर् + भ्रातृबन्धुभिः, गोविन्दा+ पहृतात् + मानो

अन्तर्गृहगताः(ख्) काश्चिद्- गोप्योऽलब्धविनिर्गमाः ।

कृष्णं(न्) तद्भावनायुक्ता, दध्युर्मीलितलोचनाः ॥ 9॥

अन्तर्+ गृहगताः(ख्),गोप्योऽ+लब्ध+ विनिर्गमाः, तद्+ भावना+ युक्ता, दध्युर्मी+लितलोचनाः

दुः(स्)सहप्रेष्ठविरह- तीव्रतापधुताशुभाः ।
ध्यानप्राप्ताच्युताश्लेष- निर्वृत्या क्षीणमङ्गलाः ॥ 10॥

दुः(स्)सह+ प्रेष्ठ+ विरह, तीव्रता+ पधुता+ शुभाः ,ध्या+ नप्राप्ता+ च्युताश्लेष,

तमेव परमात्मानं(ञ्),जारबुद्ध्यापि सङ्गताः।
जहुर्गुणमयं(न्) देहं(म्), सद्यः(फ्) प्रक्षीणबन्धनाः ॥ 11॥

जार+ बुद्ध्यापि, जहुर्+ गुणमयं(न्)

## राजोवाच

कृष्णं(वँ) विदुः(फ्) परं(ङ्) कान्तं(न्), न तु ब्रह्मतया मुने ।
गुणप्रवाहोपरमस्- तासां(ङ्) गुणधियां(ङ्) कथम् ॥ 12॥

गुण+ प्रवाहो+ परमस्

## श्रीशुक उवाच

उक्तं(म्) पुरस्तादेतत्ते, चैद्यः(स्) सिद्धिं(यँ) यथा गतः ।
द्विषन्नपि हृषीकेशं(ङ्), किमुताधोक्षजप्रियाः ॥ 13॥

पुरस्ता+ देतत् + ते, द्विषन् + नपि, किमुताधो+ क्षजप्रियाः

नृणां(न्) निः(श्)श्रेयसार्थाय, व्यक्तिर्भगवतो नृप ।
अव्ययस्याप्रमेयस्य , निर्गुणस्य गुणात्मनः ॥ 14॥

निः(श्)श्रे+ यसार्थाय, व्यक्तिर् + भगवतो, अव्ययस् + याप्रमे+ यस्य

कामं(ङ्) क्रोधं(म्) भयं(म्) स्नेह- मैक्यं(म्) सौहृदमेव च ।
नित्यं(म्) हरौ विदधतो, यान्ति तन्मयतां(म्) हि ते ॥ 15॥

न चैवं(वँ) विस्मयः(ख्) कार्यो, भवता भगवत्यजे ।
योगेश्वरेश्वरे कृष्णे, यत एतद् विमुच्यते ॥ 16॥

ता दृष्ट्वान्तिकमायाता, भगवान् व्रजयोषितः ।
अवदद् वदतां(म्) श्रेष्ठो, वाचः(फ्) पेशैर्विमोहयन् ॥ 17॥

दृष्ट्वान् + तिकमायाता, पेशैर् + विमो+ हयन्

श्रीभगवानुवाच

स्वागतं(वँ) वो महाभागाः(फ्), प्रियं(ङ्) किं(ङ्) करवाणि वः ।
व्रजस्यानामयं(ङ्) कच्चिद्, ब्रूतागमनकारणम् ॥ 18॥

व्रजस्या+ नामयं(ङ्), ब्रूता+गमनका+रणम्

रजन्येषा घोररूपा, घोरसत्त्वनिषेविता ।
प्रतियात व्रजं(न्) नेह, स्थेयं(म्) स्त्रीभिः(स्) सुमध्यमाः ॥ 19॥

घोर+ सत्त्व+ निषेविता

मातरः(फ्) पितरः(फ्) पुत्रा, भ्रातरः(फ्) पतयश्च वः ।
विचिन्वन्ति ह्यपश्यन्तो, मा कृढ्वं(म्) बन्धुसाध्वसम् ॥ 20॥

विचिन् + वन्ति, ह्य+ पश्यन्तो, बन्धु+ साध्व+सम्

दृष्टं(वँ) वनं(ङ्) कुसुमितं(म्), राकेशकररं(ञ्)जितम् ।
यमुनानिललीलैजत्-तरुपल्लवशोभितम् ॥ 21॥

यमुना+ निललीलै+ जत्, तरु+ पल्लवशो+ भितम्

तद् यात मा चिरं(ङ्) गोष्ठं(म्), शुश्रूषध्वं(म्) पतीन् सतीः ।
क्रन्दन्ति वत्सा बालाश्च, तान् पाययत दुह्यत ॥ 22॥

शुश्रू+ षध्वं(म्), क्रन्+ दन्ति

अथवा मदभिस्नेहाद्-भवत्यो यन्त्रिताशयाः ।
आगता ह्युपपन्नं(वँ) वः(फ्), प्रीयन्ते मयि जन्तवः ॥ 23॥

मदभिस् + नेहाद् , यन्त्रिता+ शयाः, ह्युप+ पन्नं(वँ)

भर्तुः(श्) शुश्रूषणं(म्) स्त्रीणां(म्), परो धर्मो ह्यमायया ।
तद्बन्धूनां(ञ्) च कल्याण्यः(फ्), प्रजानां(ञ्) चानुपोषणम् ॥ 24॥

तद्+ बन्धूनां(ञ्)

दुः(श्)शीलो दुर्भगो वृद्धो, जडो रोग्यधनोऽपि वा ।
पतिः(स्) स्त्रीभिर्न हातव्यो, लोकेप्सुभिरपातकी ॥ 25॥

लोकेप् + सुभिरपा+ तकी

अस्वर्ग्यमयशस्यं(ञ्) च, फल्गु कृच्छ्रं(म्) भयावहम् ।
जुगुप्सितं(ञ्) च सर्वत्र, औपपत्यं(ङ्) कुलस्त्रियाः ॥ 26॥

अस्+ वर्ग्य+ मयशस्यं(ञ्), जुगुप्+ सितं(ञ्), औप+ पत्यं(ङ्)

श्रवणाद् दर्शनाद् ध्यानान्- मयि भावोऽनुकीर्तनात् ।
न तथा सन्निकर्षेण, प्रतियात ततो गृहान् ॥ 27॥

सन् + निकर्षेण

श्रीशुक उवाच

इति विप्रियमाकर्ण्य ,गोप्यो गोविन्दभाषितम् ।
विषण्णा भग्नसं(ङ्)कल्पाश्-चिन्तामापुर्दुरत्ययाम् ॥ 28॥

विप्रियमा+ कर्ण्य, भग्न+ सं(ङ्)कल्पाश्, चिन्तामा+ पुर्दुरत् + ययाम्

कृत्वा मुखान्यव शुचः(श्) श्वसनेन शुष्यद्
बिम्बाधराणि चरणेन भुवं(लँ) लिखन्त्यः ।
अस्रैरुपात्तमषिभिः(ख्) कुचकुं(ङ्)कुमानि,
तस्थुर्मृजन्त्य उरुदुःखभराः(स्) स्म तूष्णीम् ॥ 29॥

अस्+ रैरुपात्+ तमषिभिः(ख्), तस्थुर्+ मृजन्त्य

प्रेष्ठं(म्) प्रियेतरमिव प्रतिभाषमाणं(ङ्),
कृष्णं(न्) तदर्थविनिवर्तितसर्वकामाः ।
नेत्रे विमृज्य रुदितोपहते स्म किं(ञ्)चित्
सं(म्)रम्भगद्गदगिरोऽब्रुवतानुरक्ताः ॥ 30॥

तदर्थ+ विनिवर्+ तित+ सर्वकामाः, सं(म्)रम्भ+ गद्गदगिरोऽ+ ब्रुवता+ नुरक्ताः

गोप्य ऊचुः

मैवं(वँ) विभोऽर्हति भवान् गदितुं(न्) नृशं(म्)सं(म्),
सन्त्यज्य सर्वविषयां(म्)स्तव पादमूलम् ।
भक्ता भजस्व दुरवग्रह मा त्यजास्मान्
देवो यथाऽऽदिपुरुषो भजते मुमुक्षून् ॥ 31॥

सन् + त्यज्य

यत्पत्यपत्यसुहृदामनुवृत्तिरङ्ग
स्त्रीणां(म्) स्वधर्म इति धर्मविदा त्वयोक्तम् ।
अस्त्वेवमेतदुपदेशपदे त्वयीशे
प्रेष्ठो भवां(म्)स्तनुभृतां(ङ्) किल बन्धुरात्मा ॥ 32॥

यत्पत्+यपत्य+सुहृदा+मनुवृत्तिरङ्ग, अस्त्वे+ वमे+तदुपदे+शपदे, भवां(म्)स्+ तनुभृतां(ङ्)

कुर्वन्ति हि त्वयि रतिं(ङ्) कुशलाः(स्) स्व आत्मन्
नित्यप्रिये पतिसुतादिभिरार्तिदैः(ख्) किम् ।
तन्नः(फ्) प्रसीद परमेश्वर मा स्म छिन्द्या
आशां(न्) भृतां(न्) त्वयि चिरादरविन्दनेत्र ॥ 33॥

पतिसुता+ दिभिरार्+ तिदैः(ख्),

चित्तं(म्) सुखेन भवतापहृतं(ङ्) गृहेषु
यन्निर्विशत्युत करावपि गृह्यकृत्ये ।
पादौ पदं(न्) न चलतस्तव पादमूलाद्-
यामः(ख्) कथं(वँ) व्रजमथो करवाम किं(वँ) वा ॥ 34॥

यन् + निर् + विशत्युत

सिञ्चाङ्ग नस्त्वदधरामृतपूरकेण
हासावलोककलगीतजहृच्छयाग्निम् ।
नो चेद् वयं(वँ) विरहजाग्न्युपयुक्तदेहा
ध्यानेन याम पदयोः(फ्) पदवीं(म्) सखे ते ॥ 35॥

नस् + त्वदधरा+मृतपू+ रकेण,

हासावलो+ककलगी+ तजहृच् + छयाग्निम्, विरहजाग् + न्युप+युक्तदेहा

यर्ह्यम्बुजाक्ष तव पादतलं(म्) रमाया
दत्तक्षणं(ङ्) क्वचिदरण्यजनप्रियस्य ।
अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमङ्ग
स्थातुं(न्) त्वयाभिरमिता बत पारयामः ॥ 36॥

यर्+ ह्यम् + बुजाक्ष, क्वचिदरण् + यजनप्रियस्य, अस् + प्राक्ष्म, नान् + यसमक्ष+ मङ्ग

श्रीर्यत्पदाम्बुजरजश्चकमे तुलस्या
लब्ध्वापि वक्षसि पदं(ङ्) किल भृत्यजुष्टम् ।
यस्याः(स्) स्ववीक्षणकृतेऽन्यसुरप्रयासस्-
तद्वद् वयं(ञ्) च तव पादरजः(फ्) प्रपन्नाः ॥ 37॥

श्रीर्यत् + पदाम् + बुजरजश् + चकमे, स्ववी+ क्षणकृतेऽन् + यसुरप्रयासस्

तन्नः(फ्) प्रसीद वृजिनार्दन तेऽङ्घ्रिमूलं(म्),
प्राप्ता विसृज्य वसतीस्त्वदुपासनाशाः ।
त्वत्सुन्दरस्मितनिरीक्षणतीव्रकाम-
तप्तात्मनां(म्) पुरुषभूषण देहि दास्यम् ॥ 38॥

वसतीस्+ त्वदुपा+ सनाशाः, त्वत्+ सुन्दरस्+ मितनिरी+ क्षणतीव्र+ काम

वीक्ष्यालकावृतमुखं(न्) तव कुण्डलश्री-
गण्डस्थलाधरसुधं(म्) हसितावलोकम् ।
दत्ताभयं(ञ्) च भुजदण्डयुगं(वँ) विलोक्य,
वक्षः(श्)श्रियैकरमणं(ञ्) च भवाम दास्यः ॥ 39॥

वीक्ष्या+ लका+ वृतमुखं(न्), गण्डस्+ थला+ धरसुधं(म्), वक्षः(श्)+ श्रियै+ करमणं(ञ्)

का स्त्र्यङ्ग ते कलपदायतमूर्च्छितेन,
सम्मोहिताऽऽर्यचरितान्न चलेत्त्रिलोक्याम् ।
त्रैलोक्यसौभगमिदं(ञ्) च निरीक्ष्य रूपं(यँ),
यद् गोद्विजद्रुममृगाः(फ्) पुलकान्यबिभ्रन् ॥ 40॥

कलपदा+ यतमूर्च् + छितेन ,सम्मोहिताऽऽर्+ यचरितान्+ न ,त्रैलोक्यसौ+ भगमिदं(ञ्)
गोद्विज+ द्रुम+ मृगाः(फ्) ,पुलकान्+ यबिभ्रन्

व्यक्तं(म्) भवान् व्रजभयार्तिहरोऽभिजातो,
देवो यथाऽऽदिपुरुषः(स्) सुरलोकगोप्ता ।
तन्नो निधेहि करपं(ङ्)कजमार्तबन्धो,
तप्तस्तनेषु च शिरस्सु च किं(ङ्)करीणाम् ॥ 41॥

व्रजभयार्+ तिहरोऽ+ भिजातो ,करपं(ङ्)कज+ मार्तबन्धो

श्रीशुक उवाच

इति विक्लवितं(न्) तासां(म्), श्रुत्वा योगेश्वरेश्वरः ।

प्रहस्य सदयं(ङ्) गोपी- रात्मारामोऽप्यरीरमत् ॥ 42॥

रात्मा+ रामोऽप्यरी+ रमत्

ताभिः(स्) समेताभिरुदारचेष्टितः(फ्),

प्रियेक्षणोत्फुल्लमुखीभिरच्युतः ।

उदारहासद्विजकुन्ददीधितिर्-

व्यरोचतैणां(ङ्)क इवोडुभिर्वृतः ॥ 43॥

समेता+ भिरुदा+ रचेष्टितः(फ्), प्रियेक्षणोत्+ फुल्+ लमुखी+ भिरच्युतः

उदा+ रहासद्+ विजकुन्+ ददी+ धितिर् ,इवो+ डुभिर्+ वृतः

उपगीयमान उद्गायन्, वनिताशतयूथपः ।

मालां(म्) बिभ्रद् वैजयन्तीं(वँ), व्यचरन्मण्डयन् वनम् ॥ 44॥

वनिता+ शत+ यूथपः ,व्यचरन्+ मण्डयन्

नद्याः(फ्) पुलिनमाविश्य, गोपीभिर्हिमवालुकम् ।

रेमे तत्तरलानन्द- कुमुदामोदवायुना ॥ 45॥

पुलिनमा+ विश्य, गोपीभिर्+ हिमवा+ लुकम् ,तत्+तरलानन्द ,कुमुदा+ मोदवायुना

बाहुप्रसारपरिरम्भकरालकोरु-

नीवीस्तनालभननर्मनखाग्रपातैः ।

क्ष्वेल्यावलोकहसितैर्व्रजसुन्दरीणा-

मुत्तम्भयन् रतिपतिं(म्) रमयाञ्चकार ॥ 46॥

बाहुप्रसा+ रपरिरम्+ भकरा+ लकोरु, नीवीस्+ तना+ लभननर्+ मनखाग्र+ पातैः

क्ष्वेल्या+ वलो+ कहसितैर्+ व्रजसुन्दरीणा ,मुत्+ तम्भयन्

एवं(म्) भगवतः(ख्) कृष्णाल्- लब्धमाना महात्मनः ।

आत्मानं(म्) मेनिरे स्त्रीणां(म्), मानिन्योऽभ्यधिकं(म्) भुवि ॥ 47॥

मानिन्योऽभ्+ यधिकं(म्)

तासां(न्) तत् सौभगमदं(वँ्), वीक्ष्य मानं(ञ्) च केशवः ।
प्रशमाय* प्रसादाय, त*त्रैवान्तरधीयत ॥ 48॥

तत्रैवान्+ तरधीयत

इति* श्रीम*द्भागवते महापुराणे पारमहं(म्)स्यां(म्) सं(म्)हितायां(न्)
दशम*स्क*न्धे पूर्वार्धे भगवतो रास*क्रीडावर्णनं(न्) नामैकोन*त्रिं(म्)शोऽध्यायः ॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुद*च्यते
पूर्ण*स्य पूर्णमादाय पूर्णमेवावशि*ष्यते।।
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

